## अञ्चोऽनपादाने। (४८/३०२४)

अञ्चतेः [1]उत्तरपदस्य निष्ठातकारस्य नकारादेशो भवति न चेदपादानं तत्र भवति। समक्नौ शकुनेः पादौ। [2]तस्मात् पशवो न्यक्नाः। अनपादाने इति किम्? उदक्तम् उदकं कूपात्[3]। व्यक्तम् इत्येतद् अञ्जेः रूपम्॥

## दिवोऽविजिगीषायाम्। (४९/३०२८)

दिवः उत्तरस्य निष्ठातकारस्य नकारादेशो भवति अविजिगीषायामर्थे। आद्यूनः। परिद्यूनः। अविजिगीषायाम् इति किम्? द्यूतं वर्तते। विजिगीषया हि तत्राक्षपातनादि क्रियते॥

## निर्वाणोऽवाते। (५०/३०२९)

निर्वाणः इति निस्पूर्वाद् वातेरुत्तरस्य निष्ठातकारस्य नकारो निपात्यते, न चेद् वाताधिकरणो [4]वात्यर्थो भवति। निर्वाणः अग्निः। निर्वाणः प्रदीपः। निर्वाणः भिक्षुः। अवाते इति किम्? निर्वातः वातः। निर्वातं वातेन। निर्वाणः प्रदीपो वातेन इत्यत्र तु प्रदीपाधिकरणो [5]वात्यर्थः, वातस्तु तस्य करणम् इति भवत्येव [6]नत्वम्॥

## शुषः कः। (५१/३०३०)

शुषेः धातोरुत्तरस्य निष्ठातकारस्य ककारादेशो भवति। शुष्कः। शुष्कवान्॥

## पचो वः। (५२/३०३१)

पचेः धातोरुत्तरस्य निष्ठातकारस्य वकारादेशो भवति। पक्वः। पक्ववान्॥

## क्षायो मः। (५३/३०३२)

[7]क्षैधातोः उत्तरस्य निष्ठातकारस्य मकारादेशो भवति। क्षामः। क्षामवान्॥

---

1. उत्तरस्य इ. 2. तदनन्तरं कूपात् क. 3. उध्दृतम् इत्यर्थः क. 4. वाक्यार्थो ह. 5. वाक्यार्थः ह. 6. नत्वम् नास्ति क. 7. क्षै इत्येतस्य इ.क.ब.